**कुम्भकर्ण** पु० कुम्भ इव कर्णावस्य। रावणानुजे राक्षसभेदे स च विश्रवसः कैकस्यां जातः तदुत्पत्तिकथा रामा० उत्त०का० सुमालिकन्यया कैकस्या अग्निहोत्रकाले सन्ध्यासमये पुत्रमभिलषन्त्या प्रार्थितेन विश्रवसा राक्षसयोनिपुत्रप्राप्तिरूपो वरोदत्तः। यथा "दारुणायां तु वेलायां यस्मात्त्वं मामुपस्थिता। शृणु तस्मात् सुतान् भद्रे! यादृशान् जनयिष्यसि। दारुणान् दारुणाकारान् दारुणाभिजनप्रियान्। प्रसविष्यसि सुश्रोणि! राक्षसान् क्रूरकर्म्मण" इत्युपक्रमे "एवमुक्ता तु सा कन्या राम! कालेन केनचित्। जनयामास बीभत्सं रक्षोरूपं सुदारुणम्। दशग्रीवं महादंष्ट्रम् नीलाञ्जनचयोपमम्। ताम्रोष्ठं विंशतिभुजं महास्यं दीप्तमूर्द्धजम्" इति रावणोत्पत्तिमुक्त्वा "तस्य त्वनन्तरं जातः कुम्भकर्णो महाबलः। प्रमाणात् यस्य विपुलं प्रमाणं नेह विद्यते। ततः शूर्पनखा नाम संजज्ञे विकृतानना। विभीषणस्तु धर्म्मात्मा कैकस्याः पश्चिमः सुतः" इति। भा०व०१७४ अ० तु पुष्पोत्कटातस्तस्योत्पत्तिरुक्ता" यथा

"पुलस्त्यस्य तु यः क्रोधादर्द्धदेहोऽभवन्मुनिः। विश्रवा नाम सक्रोधः स वैश्रवणमैक्षत। बुबुधे तन्तु सक्रोधं पितरं राक्षसेश्वरः। कुवेरस्तत्प्रसादार्थं यतते स्म सदा नृप!॥ स राजराजो लङ्कायां निवसन्नरवाहनः। राक्षसीः प्रददौ तिस्रः पितुर्वै परिचारिकाः। ताः सदा तं महात्मानं सन्तोषयितुमुद्यताः। ऋषिं भरतशार्दूल! नृत्यगीतविशारदाः। पुष्पोत्कटा च राका च मालिनी च विशाम्पते!। अन्योन्यस्पर्द्धया राजन्! श्रेयस्कामाः सुमध्यमाः। तासां स भगवांस्तुष्टो महात्मा प्रददौ वरान्। लोकपालोपमान् पुत्रानेकैकस्या यथेप्सितान्। पुष्पोत्कटायां जज्ञाते द्वौ पुत्रौ राक्षसेश्वरौ। कुम्भकर्णदशग्रीवौ बलेनाप्रतिमौ भुवि। मालिनी जनयामास पुत्रमेकं विभीषणम्। राकायां मिथुनं जज्ञे खरः शूर्पणखा तथा। विभीषणस्तु रूपेण सर्वेभ्योऽभ्यधिकोऽभवत्। स बभूव महाभागो धर्म्मगोप्ता क्रियारतिः। दशग्रीवस्तु सर्वेषां श्रेष्ठो राक्षसपुङ्गवः। महोत्साहो महावीर्य्यो महासत्वपराक्रमः। कुम्भकर्णो बलेनासीत् सर्वेभ्योऽभ्यधिको युधि। मायावी रणशौण्डश्च रौद्रश्च रजनीचरः"। तस्य ब्रह्मतोवरप्राप्तिरुक्ता रामा०उ० का०१० सर्गे यथा "इत्युक्ता कुम्भकर्णाय वरं दातुमवस्थितम्। जापपतिं सुराःसर्वे वाक्यं प्राञ्जलयोऽब्रुवन्। न तावत् कुम्भकर्णाय प्रदातव्योवरस्त्वया। जानीषे हि यथा लोकांस्त्रासयत्येष दुर्मनाः। नन्दनेऽप्सरसः सप्त महेन्द्रानुचरा दश। अनेन भक्षिता ब्रह्मन्! ऋषयो मानुषास्तथा। अलब्धवरपूर्वेण यत् कृतं राक्षसेन तु। यद्येष वरलब्धःस्याद्भक्षयेद्भुवनत्रयम्। वरव्याजेन मोहोऽस्मै दीयताममितप्रभ!। लोकानां स्वस्ति चैवं स्यादभवेदस्य च संमतिः। एवमुक्तः सुरैर्ब्रह्माऽचिन्तयत्पद्मसम्भवः। चिन्तिता चोपतस्थेऽस्य पार्श्वं देवी सरस्वती। प्राञ्जलिः सा तु पार्श्वस्था प्राह वाक्यं सरस्वती। इयमस्म्यागता देव! किं कार्य्यं करवाण्यहम्। प्रजापतिस्तु तां प्राप्तां प्राह वाक्यं सरस्वतीम्। वाणि! त्वं राक्षसेन्द्रस्य भव वाग् देवतेप्सिता। तथेत्युक्ता प्रस्थिता सा प्रजापतिरथाब्रवीत्। कुम्भकर्ण! महाबाहो! वरं वरय योमतः। कुम्भकर्णस्तु तद्वाक्यं श्रुत्वा वचनमब्रवीत्। स्वप्तुं वर्षाण्यनेकानि देवदेव! ममेप्सितम्। एवमस्त्विति तच्चोक्त्वा प्रायात् ब्रह्मा सुरैः समम्। देवी सरस्वती चैव राक्षसं तं जहौ पुनः। ब्रह्मणा सह देवेषु गतेषु च नभस्तलम्। विमुक्तोऽसौ सरस्वत्या स्वां संज्ञां च ततोगतः। कुम्भकर्णस्तु दुष्टात्मा चिन्तयामास दुःखितः। ईदृशं किमिदं वाक्यं ममाद्य वदनाच्च्युतम्। अहं व्यामोहितो देवैरिति मन्ये तदागतैः"।

स च रामेण हत इति रामा० स्थितम् भारते तु लक्ष्मणेन निहत इति स्थितम् यथा भा० वन० २८६ अ० "कुम्भकर्णो महेष्वासः प्रगृहीतशिलायुधः। अभिदुद्राव सौमित्रिमुद्यम्य महतीं शिलाम्। तस्यापि पततस्तूर्णं क्षुराभ्यामुच्छ्रितौ करौ। चिच्छेद निशिताग्राभ्यां स बभूव चतुर्भुजः। तानप्यस्य भुजान् सर्वान् प्रगृहीतशिलायुधान्। क्षुरैश्चिच्छेद लघ्वस्त्रं सौमित्रिः प्रतिदर्शयन्। स बभूवातिकायश्च बहुपादशिरोभुजः। तं ब्रह्मास्त्रेण सौमित्रिर्ददाराद्रिचयोपमम्। स पपात महावीर्य्यो दिव्यास्त्राभिहतो रणे। महाशनिविनिर्दग्धः पादपोऽङ्कुरवानिव। तं दृष्ट्वा वृत्रसङ्काशं कुम्भकर्णं तरस्विनम्। गतासुं पतितं भूमौ राक्षसाः प्राद्रवन् भयात्"। उत्पत्तौ वधे च विरोधस्तु कल्पभेदात् समाधेयः। स च विष्णुपारिषदविजयावतारः सनत्कुमारादिमुनिशापात् आसुरभावमापेदे तत्कथा भाग० अनुसन्धेया।

**कुम्भकामला** स्त्री कुम्भाख्या कामला। भावप्र० उक्ते कामलारोगभेदे। "कामला बहुपित्तैषा कोष्ठशाखा